# संस्कृत
# षष्ठी कक्षा
# श्रुति जायसवाल

# प्रथमः पाठः

## अकारान्त-पुंलिङ्गः

वाचनम्

विवरणम्

पाठस्य वाचनम्



एषः कः?
एषः चषकः।
किम् एषः बृहत्?
न, एषः लघुः।


स: कः?
स: सौचिकः।
सौचिकः किं करोति?
किं सः खेलति?
न, सः वस्त्रं सीव्यति।





एतौ कौ?
एतौ शुनकौ स्तः।
किम् एतौ गर्जतः?
न, एतौ उच्चैः बुक्कतः।

तौ कौ?
तौ बलीवर्दौ स्तः।
किं तौ धावतः?
न, तौ क्षेत्रं कर्षतः।






एते के?
एते स्यूताः सन्ति।
किम् एते हरितवर्णाः?
नहि, एते नीलवर्णाः सन्ति।

ते के?
ते वृद्धाः सन्ति।
किं ते गायन्ति?
नहि ते हसन्ति।








किम् एषः बृहत् चषकः?

न, एषः लघुः चषकः।



बृहत् चषकः

- किम् एषः बृहत् ? = Is this big?
- आम् = Yes
- न = No

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषः | एतौ | एते |
| कः | कौ | के |
| चषकः | चषकौ | चषकाः |

एषः - पुंलिङ्ग-सर्वनामशब्दः। एकवचनम्।

कः - प्रश्नवाचकः। पुंलिङ्ग-सर्वनामशब्दः। एकवचनम्।

चषकः - अकारान्तपुंलिङ्ग-शब्दः। एकवचनम्।

स: क:?
स: सौचिक:।
सौचिक: किं करोति?
किं स: खेलति?
न, स: वस्त्रं सीव्यति।



| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सः | तौ | ते |
| कः | कौ | के |
| सौचिकः | सौचिकौ | सौचिकाः |
| खेलति | खेलतः | खेलन्ति |
| सीव्यति | सीव्यतः | सीव्यन्ति |

खेलति = क्रीडति। (Plays)

सीव्यति = सिलाई करता है (Sews)

सः - पुंलिङ्ग-सर्वनामशब्दः। एकवचनम्।

सौचिकः - अकारान्तः पुंलिङ्ग-शब्दः। एकवचनम्।

खेलति - क्रियापदम्। एकवचनम्।

सीव्यति - क्रियापदम्। एकवचनम्।



एतौ कौ?
एतौ शुनकौ स्त:।
किम् एतौ गर्जत:?
न, एतौ उच्चै: बुक्कत:।

गर्जतः = गर्जते है। (Roar)

उच्चैः = जोर से (Loudly)

बुक्कतः = भौंकते हैं। (Bark)



सिंहौ गर्जतः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषः | एतौ | एते |
| कः | कौ | के |
| शुनकः | शुनकौ | शुनकाः |
| गर्जति | गर्जतः | गर्जन्ति |
| बुक्कति | बुक्कतः | बुक्कन्ति |

एतौ - पुंलिङ्ग-सर्वनामशब्दः। द्विवचनम्।

कौ - प्रश्नवाचकः। पुंलिङ्ग-शब्दः। द्विवचनम्।

**शुनकौ** - अकारान्तपुंलिङ्ग-शब्दः। द्विवचनम्।

गर्जतः - क्रियापदम्। द्विवचनम्।

बुक्कतः - क्रियापदम्। द्विवचनम्।

तौ कौ?

तौ बलीवर्दौ स्तः।

किं तौ धावतः?

न, तौ क्षेत्रं कर्षतः।



| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सः | तौ | ते |
| कः | कौ | के |
| बलीवर्दः | बलीवर्दौ | बलीवर्दाः |
| धावति | धावतः | धावन्ति |
| कर्षति | कर्षतः | कर्षन्ति |

धावतः = दौडते हैं / Run

क्षेत्रम् = खेत / Farm

कर्षतः = जोतते है / Plough

तौ - पुंलिङ्ग-शब्दः। द्विवचनम्।

कौ - प्रश्नवाचकः। पुंलिङ्ग-शब्दः। द्विवचनम्।

बलीवर्दौ - अकारान्तः पुंलिङ्ग-शब्दः। द्विवचनम्।

कर्षतः - क्रियापदम्। द्विवचनम्।



एते के?

एते स्यूताः सन्ति।

किम् एते हरितवर्णाः?

नहि, एते नीलवर्णाः सन्ति।

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषः | एतौ | एते |
| कः | कौ | के |
| स्यूतः | स्यूतौ | स्यूताः |
| हरितवर्णः | हरितवर्णौ | हरितवर्णाः |
| नीलवर्णः | नीलवर्णौ | नीलवर्णाः |

नहि = न

हरितवर्णः

नीलवर्णः

एते - पुंलिङ्ग-सर्वनामशब्दः। बहुवचनम्।
के - प्रश्नवाचकः। पुंलिङ्ग-शब्दः। बहुवचनम्।
स्यूताः - अकारान्तः पुंलिङ्ग-शब्दः। बहुवचनम्।
हरितवर्णाः - अकारान्तः पुंलिङ्ग-शब्दः। बहुवचनम्।
नीलवर्णाः - अकारान्तः पुंलिङ्ग-शब्दः। बहुवचनम्।
सन्ति - क्रियापदम्। बहुवचनम्।




| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषः | एतौ | एते |
| कः | कौ | के |
| वृद्धः | वृद्धौ | वृद्धाः |
| अस्ति | स्तः | सन्ति |
| गायति | गायतः | गायन्ति |
| हसति | हसतः | हसन्ति |

सन्ति = हैं / Are
गायन्ति = गाते हैं / Sing
हसन्ति = हँसते हैं / Smile

ते - पुंलिङ्ग-सर्वनामशब्दः। बहुवचनम्।
के - प्रश्नवाचकः। पुंलिङ्ग-शब्दः। बहुवचनम्।
वृद्धाः - अकारान्तः पुंलिङ्ग-शब्दः। बहुवचनम्।
सन्ति - क्रियापदम्। बहुवचनम्।
गायन्ति - क्रियापदम्। बहुवचनम्।
हसन्ति - क्रियापदम्। बहुवचनम्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| अकारान्तपुंल्लिङ्गशब्दाः - | | | |
| | सौचिकः | शुनकौ | वृद्धाः |
| | | | इत्यादयः |
| क्रियापदानि - | | | |
| | अस्ति | स्तः | सन्ति |

प्रथमः पाठः

अकारान्तपुंलिङ्गः


# अभ्यासः

१.(क) उच्चारणं कुरुत -



छा - त्रः

छात्रः



ग - जः

गजः




घ - टः

घटः



शिक् - ष - कः

शिक्षकः



म - क - रः

मकरः




दी - प - कः

दीपकः



म - यू - रः

मयूरः



बि - डा - लः

बिडालः



अश् - वः

अश्वः





शु - कः

शुकः




मू - ष - कः

मूषकः



चन् - द्रः

चन्द्रः



बा - ल - कः

बालकः



चा - ल - कः

चालकः



गा - य - कः


गायकः

## १ (ख) - चित्राणि दृष्ट्वा पदानि उच्चारयत -

कृषकः




वृषभः




भल्लूकः




मण्डूकः



कपोतः



पर्यङ्कः




दूरभाषः



काकः



सौचिकः



## २. (क) वर्णसंयोजनेन पदं लिखत।

च् + अ + ष् + अ + क् + अः = चषकः

च ष कः

स् + औ + च् + इ + क् + अः = सौचिकः

सौ चि कः

श् + उ + न् + अ + क् + औ = शुनकौ

शु न कौ

ध् + आ + व् + अ + त् + अः = धावतः

धा व तः

व् + ऋ + द् + ध् + आः = वृद्धाः

वृ द्धाः

ग् + आ + य् + अ + न् + त् + इ = गायन्ति

गा य न्ति

## 2. (ख) पदानां वर्णविच्छेदं प्रदर्शयत-

यथा – लघुः = ल् + अ + घ् + उः (ल, घुः)

सीव्यति = स् + ई + व् + य् + अ + त् + इ (सी, व्य, ति)

वर्णाः = व् + अ + र् + ण् + आः (व, र्णाः)

कुक्कुरौ = क् + उ + क् + क् + उ + र् + औ (कु, क्कु, रौ)


मयूराः = म् + अ + य् + ऊ + र् + आः (म, यू, राः)

बालकः = ब् + आ + ल् + अ + क् + अः (बा, ल, कः)

## ३. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयत -

| “अः” एकवचनम् | “औ” द्विवचनम् | “आः” बहुवचनम् |
| --- | --- | --- |
| चषकः | चषकौ | चषकाः |
| बलीवर्दः | बलीवर्दौ | बलीवर्दाः |
| शुनकः | शुनकौ | शुनकाः |
| मृगः | मृगौ | मृगाः |
| सौचिकः | सौचिकौ | सौचिकाः |
| मयूरः | मयूरौ | मयूराः |

## ४. चित्राणि दृष्ट्वा संस्कृतपदानि लिखत-



← गजः



← काकः




चन्द्रः



तालः




भल्लूकः



बिडालः

# ५. चित्रं दृष्ट्वा उत्तरं लिखत-


बालकः किं करोति?
**बालकः** पठति।



अश्वौ किं कुरुतः?
**अश्वौ** धावतः।



कुक्कुराः किं कुर्वन्ति?
**कुक्कुराः** बुक्कन्ति।




**छात्रौ** किं कुरुतः?


**छात्रौ** पश्यतः।



कृषकः किं करोति?
**कृषकः** कृषिकार्यं करोति।



गजौ किं कुरुतः?
**गजौ** गच्छतः।



## ६. पदानि संयोज्य वाक्यानि रचयत -

| कर्तृपदानि | क्रियापदानि |
|---|---|
| गजाः | नृत्यन्ति |
| सिंहौ | गायति |
| गायकः | पठतः |
| बालकौ | चलन्ति |
| मयूराः | गर्जतः |

## ६. पदानि संयोज्य वाक्यानि रचयत -

उत्तरम् -

| | |
|---|---|
| गजाः | नृत्यन्ति |
| सिंहौ | गायति |
| गायकः | पठतः |
| बालकौ | चलन्ति |
| मयूराः | गर्जतः |

## ७. मञ्जूषातः पदं चित्वा रिक्तस्थानानि पूरयत -

**नृत्यन्ति, गर्जतः, धावति, चलतः, फलन्ति, खादति**

क) मयूराः <u>नृत्यन्ति</u>।

ख) गजौ <u>चलतः</u>।

ग) वृक्षाः <u>फलन्ति</u>।

घ) सिंहौ <u>गर्जतः</u>।

ङ) वानरः <u>खादति</u>।

च) अश्वः <u>धावति</u>।

८. 'सः, तौ, ते' इत्येतेभ्यः उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत -

# सर्वनामपदानि


| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सः | तौ | ते |
| [ वह ] | [ वे दोनो ] | [ वे सब ] |

सः तौ ते

यथा –

अश्वः धावति। = सः धावति।





गजाः चलन्ति। - ते ------------चलन्ति।




छात्रौ पठतः। - तौ --------------पठतः।

वानराः क्रीडन्ति। - ते ---------- क्रीडन्ति।



गायकः गायति। - सः ----------- गायति।





मयूराः नृत्यन्ति । - ते ---------- नृत्यन्ति

## त्रीणि लिङ्गानि

| | पुंल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| उदा० | मेघः | पेटिका | फलम् |
| | कृष्णः | छुरिका | पुष्पम् |

## त्रीणि वचनानि

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| बालकः | बालकौ | बालकाः |
| महिला | महिले | महिलाः |
| फलम् | फले | फलानि |

# धन्यवादः